# Vividha Devata Stuti

# વિવિધ દેવતાસ્તુતિઃ

## Document Information

Text title : Vividha Devata Stuti

File name : vividhadevatAstutiH.itx

Category : deities_misc, stuti

Location : doc_deities_misc

Proofread by : Paresh Panditrao

Description/comments : Ganga Mahatmya And Stuti Ratnavali By Swami Umeshvaranand Tirth

Latest update : July 8, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

# વિવિધ દેવતાસ્તુતિઃ

ॐ પરમાત્મને નમઃ । શ્રીગણેશાય નમઃ । શ્રીસરસ્વત્યૈ નમઃ ।
ગુરવે નમઃ । ગોવિન્દાય નમઃ । વ્યાસાય નમઃ । નરનારાયણાભ્યાન્નમઃ ।
નમઃ શિવાય । વિષ્ણવે નમઃ । નમો ભગવતે વાસુદેવાય ।
દુર્ગાયૈ નમઃ । બ્રહ્મણે નમઃ ॥

પરમાત્મનઃ સ્તુતિઃ ।

યત્પાદતોયં ભવરોગવૈદ્યો
યત્પાદપાંશુર્વિમલત્વ સિદ્ધ્યૈ ।
યન્નામ દુષ્કર્મનિવારણાય
ત્વમપ્રમેયં પુરુષં નમામિ ॥ ૧॥

શ્રીગણેશસ્તુતિઃ ।

શૈલેન્દ્રજાદેહભવં સુમઙ્ગલં
બુદ્ધિપ્રદંશોક વિનાશદક્ષમ્ ।
સિદ્ધિપ્રદં જ્ઞાનપ્રદં ગજાનનં
નમામિતવિઘ્નહરં ગણાધિપમ્ ॥ ૨॥

સરસ્વતીસ્તુતિઃ ।

જ્ઞાનામૃતાબ્ધિરસ સારમયીં સુનેત્રીં
શુક્લામ્બરાં કનકભૂષણભૂષિતાઙ્ગીમ્ ।
વીણાઞ્ચ પુસ્તકધરાંસ્ફટિકાખ્યમાલાં
વાણીં નમામિ અભયાં સુમુખીં પરાભ્વામ્ ॥ ૩॥

ગોવિન્દસ્તુતિઃ ।

ગોપાલબાલકૈર્નિત્યં ક્રીડન્તંયમુના તટે ।
ગોવિન્દં સચ્ચિદાનન્દં નમામિસતતંહરિમ્ ॥ ૪॥

વ્યાસસ્તુતિઃ ।

એકવેદસ્યચત્ત્વાર શાખાકૃત્ત્વાસવિસ્તરમ્ ।

ઇતિહાસપુરાણાનાં વ્યાખ્યાતારન્નમોઽસ્તુતે ॥ ૫॥

શિવસ્તુતિઃ ।

મૃડંર્ધૂજટિં સર્વદુઃખાપ હારિં
શિવં શઙ્કરં શૂલપાણિંવરેણ્યમ્ ।
જગત્પૂજનીયં પ્રસન્નઞ્ચ શાન્તં
નમોઽસ્તુમહેશં સુમુક્તિપ્રદન્તમ્ ॥ ૬॥

વિષ્ણુસ્તુતિઃ ।

યસ્ય સ્મરણમાત્રેણ યજ્ઞદાનાદિકા ક્રિયા ।
સદ્યઃસમ્પૂર્ણતાં યાન્તિ તંવિષ્ણું પ્રણમામ્યહમ્ ॥ ૭॥

વાસુદેવસ્તુતિઃ ।

શ્રીવાસુદેવં વસુદેવપુત્રં
શ્રીદેવકીનન્દનકૃષ્ણચન્દ્રમ્ ।
શ્રીરચ્યુતં વંશીધરં વરેણ્યં
નમામિતુભ્યંસુખદંસુશાન્તમ્ ॥ ૮॥

દુર્ગાસ્તુતિઃ ।

સુશાન્તિદાત્રીં જનનીષ્ટદાત્રીં
સનાતની ત્વાં સુજનૈર્સપૂજ્યામ્ ।
અનન્તદુઃખૌઘવિનાશદક્ષાં
નમામિદુર્ગાઞ્જનદુઃખ હન્ત્રીમ્ ॥ ૯॥

સૂર્યસ્તુતિઃ ।

આદિત્યમણ્ડલસ્થન્તં શઙ્ખચક્રવરં પ્રભુમ્ ।
કિરીટિનં કુણ્ડલિનં હિરણ્યવપુસમ્ભજે ॥ ૧૦॥

રાધાસ્તુતિઃ ।

સદાષોડશવાર્ષિક્યાં શ્રીકૃષ્ણપ્રાણવલ્લભામ્ ।
વૃષભાનુસુતાં રાધાં નમામિસકલાર્થદામ્ ॥ ૧૧॥

શ્રીકૃષ્ણસ્તુતિઃ ।

અનન્તસૌન્દર્યમનન્તધામં
અનન્ત આનન્દ અનન્ત નામમ્ ।
અનન્ત ગોપીજન સેવિતાઙ્ગં
નમામિકૃષ્ણં પુરુષોત્તમોત્તમમ્ ॥ ૧૨॥

લક્ષ્મીસ્તુતિઃ ।

સ્વરાજ્ય સામ્રાજ્ય વિભૂતિદાયિનીં
અનન્ત આનન્દ સુધા પ્રદાયિનીમ્ ।
સૌભાગ્ય લક્ષ્મીં ભુવનૈકપાલિનીં
નમામિ નિત્યં સુખદાં સુશાન્તિદામ્ ॥ ૧૩॥

જગત્ગુરુસ્તુતિઃ ।

જગદ્ગુરું જગદ્વન્દ્યં જગત્ પૂજ્યં સનાતનમ્ ।
ગોવિન્દપાદ શિષ્યં તં શઙ્કરં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૪॥

ગુરુવન્દના ।

બ્રહ્માવિષ્ણુ મહેશાખ્યં શિષ્યાજ્ઞાન વિનાશકમ્ ।
મનોવાઞ્છિતદાતારન્તં ગુરું પ્રણતોસ્મ્યહમ્ ॥ ૧૫॥

ગઙ્ગાસ્તુતિઃ ।

વિષ્ણુપાદોદ્ભવાં દિવ્યાં ત્રિલોક પાવનીં શિવામ્ ।
નમામિ જાહ્નવીં ગઙ્ગા ભુક્તિમુક્તિ પ્રદાયિનીમ્ ॥ ૧૬॥

નારાયણસ્તુતિઃ ।

આપનાર ઇતિ પ્રોક્તઃ તત્ તસ્ય અયનં શુભમ્ ।
નારાયણાખ્યં તં વિષ્ણું પ્રણમામિ નિરન્તરમ્ ॥ ૧૭॥

ઇતિ શ્રી સ્વામી ઉમેશ્વરાનન્દતીર્થવિરચિતા વિવિધ દેવતાસ્તુતિઃ સમાપ્તા ।

Proofread by Paresh Panditrao

*Vividha Devata Stuti*
pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*